M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. ________

No. Ser. 142

Title: Tulsi Pooja

192

Tulasi Pūja		Title
		Author
		Editor
		Year, Vols.
		Publisher
192		Remarks

॥ तुलसिपूजाप्रारंभः ॥

192

श्रीगणेशायनमः नारदउवाच रोप्यतेयेन
विधिनापूज्यतेतुलसीसदा तन्ममाचक्ष्व
देवेशमय्यनुग्रहकारणात् १ महादेवउवा
च शुभेपक्षेशुभेवारेशुभर्क्षेचशुभेदिने
केशवार्थेशुभार्थेचरोपयेतुलसींमुने॥
२ गृहस्यांगणमध्येवागृहस्योपवने
पिवाशुचौदेशेचतुलसीमर्चयेच्छय
तोबुधः ३ मूलेचवेदिकांकुर्यादाल

वालसमन्वितां प्रातःसंध्याविधिंकृ
त्वास्नानपूर्वंदिनेदिने ॥४॥ गाय
त्र्यष्टोत्तरंहुत्वातुलसींपूजयेत्ततः॥प्राङ्मु
खोदङ्मुखोवापिस्थितःप्रयतमास
नः॥५॥ ध्यायेच्चस्तुलसीदेवींश्या
मांकमललोचनां॥ प्रसन्नांपद्मक
ह्लारैर्वदांचचतुर्भुजां॥ ६ किरीटहार

तु० पु० केयूरकुंडलादिविभूषितांधवलांकुश
२ संयुक्तांपद्मासननिषेदुषिं ७ध्यानं
देवित्रैलोक्यजननीसर्वलोकैकपालि
नी॥ आगछभगवत्यत्रप्रसीदतुलसि प्रिये॥
देव सर्वंभयाकारे सर्वदेवनमस्कृते दत्तंपा
द्यंगृहाणेदंतुलसीत्वंप्रसीदमे पाद्यं०
सर्वतीर्थमयाकारे सर्वांगमुनिषेविते इ राम
दमर्घ्यंगृहाणत्वंदेविदैत्यांतकप्रिये अर्घ्यं० २

सर्वलोकस्यरक्षार्थंसदासंधिन्नी कारिणि॥
गृहाणतुलसिप्रीत्याइदमाचमनियकं आचम०
गंगादिभ्यानदीभ्यश्चसमानितमिदंजलं॥
स्नानार्थंतुलसिप्रीत्यास्वछंतत्प्रतिगृह्य
तां स्नानं० क्षीरोदमथनोद्भूते चंद्रलक्ष्मी
सहोदरे गृह्यतांपरिधानार्थंइदंसौभांबर
शुभे वस्त्रं श्रीखंडकुंकुमंदिव्यंकर्पूरागरु
संयुतं कल्पितंतेमहादेविप्रीत्यर्थंप्रतिगृह्य
तां चंदनं० नीलोत्पलाब्जकह्लारमालत्यादिनि

तु·सी· शोभने।पद्मानिगंधवंतीशपुष्पाणिप्रतिगृह्य
२ तां पुष्पाणि॰धुपंगृहाणदेवेशिमनोहारिसु
गुग्गुलं आज्यमिश्रंतुलसीभक्त्याभीष्टप्रदा। तु
यिनि धूपं॰अज्ञानतिमिरांधस्यज्ञानदीपप्र
दायिनि॥ददामितुलसीप्रीत्यैदीपोयंप्रतिग
ह्यतां दीपं॰नमस्तेजगतांनाथेप्राणिनांप्रि
यदर्शने॥यथाशक्तिमयादत्तंनैवेद्यंप्रतिगृ
ह्यतां॥नैवेद्यं॰नमोभगवतिश्रेष्ठेनारायणि
जगन्मये॥तुलसित्वरयादेविपानीयंप्रतिगृह्य राम २

तां पानीयं॰अमृतमंथनोत्तेसंभूतेतुलस्यमृतरूपि
णि॥कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यतां॥
तांबुलं॰दक्षिणेदक्षिणकरेभक्तानांचप्रियंक
रे॥करोमितेसदाभक्त्याविष्णुकांते प्र दक्षि
णां प्रदक्षिणां॰नमोनमोजगद्धात्रीनमस्तेपर
मेश्वरी॥नमोनमोजगद्धात्र्येजगदाद्येनमो
नमोनमः॥नमस्कारान्॰प्रसीदममदेवेशि
कृपयापरयामुदा अभीष्टफलसंसिद्धिंकुरु
मेमाधवप्रिये॥इत्येवमर्चयेन्नित्यंप्रातरेवशु
चिर्नरः मध्याह्नेवाथसायाह्नेप्रजपेत्सजपेत्

तु०पू यत्तोनरः सर्वोपचारैरथवाचातुर्मास्येविशेष
४ तः॥ पूजयेत्तुलसींदेवींअपूपफलपायसैः॥॥
एकादशीयदास्वल्पात्तदापोष्यव्रतीनरः त
द्रात्रावेवकुर्वीततुलसीपूजनंसदा॥ इदंतु
लसीपूजामाहात्म्यंशृणुयान्नरः सकृद्वापि
पठेन्नित्यंसगच्छेद्वैष्णवंपदं २७ इतिश्री
तुलसीमाहात्म्ये तुलसिपूजाप्रकारोन्नाम
एकादशोध्यायः ॥ श्रीकृष्णार्पणमस्तु ॥